✧˖°*❋ ❋*°˖✧

# চংদ্রশেখরাষ্টকম্

# Chandrasekhar Ashtakam

in bengali

✧˖°*❋ ❋*°˖✧

# ॥ চংদ্রশেখরাষ্টকম্ ॥

চংদ্রশেখর চংদ্রশেখর চংদ্রশেখর পাহিমাম্ ।
চংদ্রশেখর চংদ্রশেখর চংদ্রশেখর রক্ষমাম্ ॥

রত্নসানু শরাসনং রজতাদ্রি শৃংগ নিকেতনং
শিংজিনীকৃত পন্নগেশ্বর মচ্যুতানল সাযকম্ ।
ক্ষিপ্রদগ্দ পুরত্রযং ত্রিদশালযৈ-রভিবংদিতং
চংদ্রশেখরমাশ্রযে মম কিং করিষ্যতি বৈ যমঃ ॥ 1 ॥

পংচপাদপ পুষ্পগংধ পদাংবুজ দ্বযশোভিতং
ফাললোচন জাতপাবক দগ্ধ মন্মধ বিগ্রহম্ ।
ভস্মদিগ্ধ কলেবরং ভবনাশনং ভব মব্যযং
চংদ্রশেখর চংদ্রশেখর চংদ্রশেখর রক্ষমাম্ ॥ 2 ॥

মত্তবারণ মুখ্যচর্ম কৃতোত্তরীয মনোহরং
পংকজাসন পদ্মলোচন পূজিতাংঘ্রি সরোরুহম্ ।
দেব সিংধু তরংগ শ্রীকর সিক্ত শুভ্র জটাধরং
চংদ্রশেখর চংদ্রশেখর চংদ্রশেখর পাহিমাম্ ॥ 3 ॥

যক্ষ রাজসখং ভগাক্ষ হরং ভুজংগ বিভূষণম্
শৈলরাজ সুতা পরিষ্কৃত চারুবাম কলেবরম্ ।
ক্ষ্বেল নীলগলং পরশ্বধ ধারিণং মৃগধারিণম্
চংদ্রশেখর চংদ্রশেখর চংদ্রশেখর পাহিমাম্ ॥ 4 ॥

কুংডলীকৃত কুংডলীশ্বর কুংডলং বৃষবাহনং
নারদাদি মুনীশ্বর স্তুতবৈভবং ভুবনেশ্বরম্ ।
অংধকাংতক মাশ্রিতামর পাদপং শমনাংতকং
চংদ্রশেখর চংদ্রশেখর চংদ্রশেখর রক্ষমাম্ ॥ 5 ॥

ভেষজং ভবরোগিণা মখিলাপদা মপহারিণং
দক্ষযজ্ঞ বিনাশনং ত্রিগুণাত্মকং ত্রিবিলোচনম্ ।
ভক্তি মুক্তি ফলপ্রদং সকলাঘ সংঘ নিবর্হণং
চংদ্রশেখর চংদ্রশেখর চংদ্রশেখর রক্ষমাম্ ॥ 6 ॥

ভক্তবত্সল-মর্চিতং নিধিমক্ষযং হরিদংবরং
সর্বভূত পতিং পরাত্পর-মপ্রমেয মনুত্তমম্ ।
সোমবারিন ভূহুতাশন সোম পাদ্যখিলাকৃতিং
চংদ্রশেখর চংদ্রশেখর চংদ্রশেখর পাহিমাম্ ॥ 7 ॥

বিশ্বসৃষ্টি বিধাযকং পুনরেবপালন তত্পরং
সংহরং তমপি প্রপংচ মশেষলোক নিবাসিনম্ ।
ক্রীডযংত মহর্নিশং গণনাথ যূথ সমন্বিতং
চংদ্রশেখর চংদ্রশেখর চংদ্রশেখর রক্ষমাম্ ॥ 8 ॥

মৃত্যুভীত মৃকংডুসূনুকৃতস্তবং শিবসন্নিধৌ
যত্র কুত্র চ যঃ পঠেন্ন হি তস্য মৃত্যুভযং ভবেত্ ।
পূর্ণমাযুররোগতামখিলার্থসংপদমাদরং
চংদ্রশেখর এব তস্য দদাতি মুক্তিমযত্নতঃ ॥ 9 ॥

✧˳······°*❋ ❋*°······˳✧

Free download PDF of all types of mantra, stotram,vandana,arati: chalisapdf.net